This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह
दाखल क्र. M-2478 विषय वेद
नाव आश्वलायन गृह्यसूत्र
लेखक / लिपीकार
पृठ 31 काळ पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2478

॥अथगृह्यसूत्रारंभः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥हरिः ॐ ३म्॥उक्तानेवैतानिकानिगृह्यालिवस्यामस्त्रयःपाक
यज्ञाहुताऽअग्नौहूयमानाअनग्नौप्रहुताःब्राह्मणभोजनेब्रह्मणिहुताअथाप्युचउदा
हरंतियःसमिधायआहुतीयोवेदेनेतिसमिधमेवापिश्रद्दधानऽआदधन्मन्येतयजऽ
इतिनमस्तस्मैयऽआहुत्यायोवेदेनेतिविधयेवाप्यस्तिश्रीतिस्तदेतत्सत्यमृषिरुवा
च॥अगोरुधायगविषेधक्षायदस्यंवचः॥घृतात्स्वादीयोमधुनश्चवोचतेतिवचएवम
इदंघृताच्चमधुनश्चस्वादीयोस्तिश्रीतिस्वादीयोस्त्वित्येवतदाह॥आतेऽअग्नऋचाह
विहृदातष्टंभरामसि॥तेतेभवंतूक्षणऋषभासोवशाउतेत्येतएवमउक्षाणश्चऋषभा
श्चवशाश्चभवंतियइमंस्वाध्यायमधीयतइतियोनमसास्वध्वरइतिनमस्कारेणैवैरव
ल्यापिनंवैदेवानमस्कारमितियज्ञोवैनमइतिहब्राह्मणंभवति॥१॥अथसायंप्रातः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिद्धस्यहविष्यस्यजुहुयादग्नेहोत्रदेवताभ्यःसोमायवनस्पतयेग्नीषोमाभ्यामिंद्रा
ग्निभ्यांद्यावापृथिवीभ्यांधन्वंतरयइंद्रायविश्वेभ्योदेवेभ्योब्रह्मणेस्वाहेत्यथबालहर
णमेताभ्यश्चैवदेवताभ्योभ्य ओषधिवनस्पतिभ्योगृहायगृहदेवताभ्योवास्तुदेवताभ्य
इंद्रायेंद्रपुरुषेभ्योयमायययमपुरुषेभ्योवरुणायवरुणपुरुषेभ्यःसोमायसोमपुरुषे
भ्यइतिप्राचीदिशंब्रह्मणेब्रह्मपुरुषेभ्यइतिमध्येविश्वेभ्योदेवेभ्यःसर्वेभ्योभूतेभ्योदि
शाचारिभ्यइतिदेवानक्षंचारिभ्यइतिनक्षंरक्षोभ्यइत्कक्षतरतःस्वधापितृभ्यइतिप्रती
चीमोषंदक्षिणाग्निनयेत्॥२॥अथगृहबलिदेवतानांकीर्त्तयिष्यामोयत्रयत्रव
तंगतेद्वारेपतामहंवंशास्कोलेचउमापतिं॥आग्नेय्यांबलभद्रंचयमंविद्युंचदक्षि
णे॥नैर्ऋत्यांस्कंदवरुणंचसोमंसूर्यंचपश्चिमे॥वायव्यामश्विनोवसवःसोमोरुद्रो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्तरः स्यादिशो ॥ ईशान्यांनक्षत्राणींद्रयहाः पूर्वस्यांदिशो ॥ गृहमध्येब्रह्माणंप्रतिष्ठा
यंत्रंहृदीदृश्रियाकीर्तीरतितनः स्मार्तंबालत्रयंगृहांगणेदेयंवाहितं ॥ येभूनाः प्र
चरंतेदिवानक्तंबालमिछंतोविदुरस्यप्रेष्टाः स्तेभ्योबालंपुरुषिकामोदद्यामंमयिपुरु
पुरुषपतेदहातुस्वाहा ॥ ऐंद्रवारुणवायव्यांयाम्यांनैर्ऋतिकाश्वये ॥ तेकाकाः प्रतिग
ह्णंतुभूम्यांपिंडंमयार्पितं ॥ वैवस्वतकुलेजातौद्वौश्यामशबलौशुनौ ॥ ताभ्यांपिंडोम
यादत्तोरक्षेतांपथिमांसदौ ॥ श्वचांडालभूतपतितपापेभ्योभूतेभ्योनक्षपेत् ॥ गो
दोहनमात्रंतत्रस्थित्वागतपथिमाकांक्षेद्वलौपादोप्रक्षाल्याचम्यगृहंप्रवेशयेत् ॥ शां
तापृथिवीशांतमंतरिक्षंशांतोद्यौर्दिव्यभयंनोऽअस्तु ॥ शिवादिशः प्रदिशउद्दिशोनऽआ रम्
पोविष्कृतः परिपांतुसर्वतः शांतिः शांतिः शांतिः ॥ इतिपारस्करगृह्यसमाप्तः ॥ अथरव २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लुप्यत्रकृचहोष्यन्त्स्याद्दृषुमात्रावरंसर्वतस्रुंडेलसुपरिलिप्योल्लिख्यषडूरवाउदग्
यतांपश्चात्सागायतेनानांतयोस्तिस्तोमध्येतदभ्युक्ष्याग्निंप्रणिधाप्यान्वाधायपरिस
मूह्यपरस्तीर्यपुरस्ताद्दक्षिणतःपश्चादुत्तरतइत्युदक्संस्रुंवंनूरुडीपर्युक्षणंपरिवा
भ्यामाज्यस्योत्पवनमग्रेछिद्रायावनंतर्गर्भौग्रादेशमात्रौकुर्शेनानांतयोरेहीत्वाऽ
गुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यांपाणिभ्यांसंविनष्टाग्रसवउत्पूनाम्यच्छिद्रेणपवित्रे
णवसोःसूर्यस्यरश्मिभिरितिप्रागुत्पूनातिसकृन्मंत्रेणाहिस्तूष्णीकृताकृतमाज्यहोमे
षुपरिस्तरणंतथाज्यभागौपाकयज्ञेषुब्रह्मार्चधन्वंतरियज्ञशूलगवचर्जमसुष्मैस्वाहे
तिजुहुयादग्निरिंद्रःप्रजापतिर्विश्वेदेवाब्रह्मेत्यनादेशएकबारेहीरध्माज्यःस्विष्टकृत
स्युरुत्यकालासदेषाभियज्ञगाथागीयते॥पाकयज्ञान्त्समासेयेकाज्यानेकबारेहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षः॥एकस्विष्टकृतः कुर्यान्नानापिसग्नेदैवतइति॥३॥उदगयनआपूर्यमाणपक्षे
कल्याणेनक्षत्रेचौलकर्मोपनयनगोदानविवाहाःसर्वकालमेकेविवाहंतेषांपुरस्ता
व्रतस्यआज्याहुतीर्जुहुयादग्नआयूंषिपवसइतितिसृभिःप्रजापतेनत्वदेतान्यन्य
इतिचव्याहृतिभिर्वासमुच्चयमेकेनेकेकांचनत्वयीमाभवसियत्कनीनामितिविवाह
चतुर्थ्यां॥४॥कुलमग्नेपरीप्सेतयेमादतःपितृतश्चेतियथोक्तंपुरस्ताद्बुद्धिमतेकन्यां
प्रयच्छेद्बुद्धिरूपशीललक्षणसंपन्नामरोगामुपयच्छेतदुर्विज्ञेयानिलक्षणान्यस्रोपं
आन्कृत्वऋतमग्नेप्रथमंजज्ञ॥ऋतेसत्संप्रतिष्ठितं॥यदियंकुमार्यभिजातातस्यामि
हप्रतिपद्यतांयत्सत्यंतद्दृश्यतामितिषंडानभिमंत्र्यकुमारीब्रूयादेषामेकंगृहाणेति
सेत्राचेदुभयतःसस्याद्भूळीयादन्यवत्यस्याःप्रजाभविष्यतीतिविद्याद्रोहात्सशुम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीचेदपुरीषाद्भूलवर्चस्त्वन्यविरासनोम्हदात्सर्वसंपन्नादेवनाऽकृतवीचत्युष्य
थाद्भूप्रजाजिनीरिणादधन्याऽमश्नान्वात्सप्तिभ्रीः॥५॥अलंकृत्यकन्यामुदकपूर्वंदे
यादेषब्राह्मोविवाहस्तस्यांजातोद्वादशावरान्द्वादशपरान्पुनात्युभयतःकृत्वेजोवे
तनेकर्मणिदयादलंकृत्यसदैवोदशावरान्दशपरान्पुनात्कभयतःसहधर्मंचरतइ
तिप्राजापत्योष्टावरानष्टपरान्पुनात्कभयतोगोमिथुनंदत्वोपयछेतसऽआर्षःसप्ता
वरान्त्सप्तपरान्पुनात्युभयतोमिथःसमयंकृत्वोपयछेतसगांधर्वोधनेनोपनोष्योपय
छेतसऽआसुरःसुतानांप्रमत्तानांवाऽपहरेत्सपैशाचोहत्वाभित्वाचशीर्षाणिरुदतीँ
रुदतीमोहरेत्सराक्षसः॥६॥अथखलूक्तावचोजनपदधर्मग्रामधर्मश्चित्वान्विवाहे
ग्नीयाधनुसमानंनहूस्यामेःपश्चादग्नेरीषदग्रमानंप्रतिष्ठाप्योत्तरपरस्तादुदकुंभंस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मन्वारब्धायांहुत्वाग्नेष्ठन्प्रत्यञ्चुरवः शाञ्जुरव्याऽआसीनायांगृभ्णामिते सौभगत्वा
यहस्तमित्यंगुष्ठमेवगृह्णीयाद्यदिकामयीतपुमांसएवमेपुत्राजायेरन्नित्यंगुलीरे
वस्त्रीकामीरोमांतेहस्तंसांगुष्ठमुभयकामःअदर्क्षिलमग्निमुदकुंभंचत्रिःपरिण
यंजपत्यमोहमस्मिसात्वंसात्वमस्यमोहंद्यौरहंपृथिवीत्वंसामाहमृक्तंनावेहावि
वहावहै॥प्रजांप्रजनयावहैसंप्रियौरोचिष्णूसुमनस्यमानौजीवेवशरदःशतमि
तिपरिणीयपरिणीयाश्मानमारोहयन्तीममश्मानमारोहाश्मेवत्वंस्थिराभव॥स
हस्वष्टनायनोभिनिष्वृनन्यतइतिवध्वंजलावुपस्तीर्यभ्राताभ्रातृस्थानोवाह्व
लाजाभावपतेप्रजामद्भ्यानांप्रस्याभिघार्यहविरवत्तंचैषोवदानधर्मोयमिरंनुदे
वंकन्याऽअग्निमयक्षत॥सऽइमांदेवोऽअर्यमाप्रेतोमुंचामुतोमुतःस्वाहा॥वरु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णंनुदेवंकन्याऽअग्निमयक्षत।।सइमांदेवोवरुणःप्रेतोमुंचातुनामुतस्माहा।।
पूषणंनुदेवंकन्याऽअग्निमयक्षत।।सइमांदेवःपूषाप्रेतोमुंचातुनामुतःस्वाहेत्य
विछंदत्यंजलिंस्रुचेवजुहुयादपरिणीयश्रूर्पपुरेनाभ्यात्संतूष्णींचतुर्थमोप्योप्यहे
कैलाजान्यरण्ययंतेतयोत्तमेआहुतीनसम्भेपततोथास्येशीरवेवमुंचतेथादक्ष
तेभवतउर्णास्रुकेकेशपक्षयोर्बद्धभवतःप्रत्तामुंचाग्निवरुणस्यपाशादित्यक्षत्तरामु
त्तरयेनामपराजितायांदिशीसप्तपदान्यभिक्रामयतीषएकपदीभूर्जीद्विपदीराय
स्पोषायत्रिपदीमायोभव्यायचतुष्पदीप्रजाभ्यःपंचपशुभ्यःषट्पदीसखासप्त
पदीभवसामामनुव्रताभव।।पुत्राग्निंदावेहैबहूँस्तेसंतुजरदष्टयइत्यभयोःसम्भाष
शीरसीउदकुंभेनाषरसिच्यब्राह्मण्याश्वदृढायोजीवपत्याजीवप्रजायाअगारण्ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रात्रींवसेध्रुवमरुंधतींसप्तऋषीनप्रतिदृष्टोवाचंविसृजेतजीवपतीप्रजांविंदेयेति
॥७॥प्रयाणेउपपद्यमानेपूषात्वेतोनयतुहस्तगृह्येतियानमारोहयेदृक्समन्वतीरिय
तेसंरभध्वमित्यधस्तैनंनावमारोहयेदुत्तरेणाक्रमयेज्जीवंरुदंतीमितिरुदत्यांविवाह
ग्निमग्नौजुह्वंनयंतिकल्याणेषुदेशेषुदक्षचतुष्पथेषुमाविहंन्पारेपांथंनइतिजपेद्वा
सेवासेसुमंगलीरियंवधूरितीक्षकानीक्षेतेहाप्रियंप्रजयातेसमृध्यतामितिगृहंप्रवे
श्येद्विवाहाग्निमुपसमाधायपश्चादास्यानडुहंचर्मास्तीर्यप्राचीवमुत्तरलोमतस्मि
न्नुपविशायांसमन्वारब्धायामाजः प्रजांजनयतुप्रजापतेरनुचतस्रभिः प्रत्यंचं
हुत्वासमंजंतुविश्वेदेवाइतिहुत्वाशाश्वतीभ्यश्चेषेणवानक्कैहरयेतःउ राम्
ध्वंमक्षारालवणाग्नीनोब्रह्मचारिणावलंकुर्वाणावधः शयानौस्यातांत्रिरात्रंहाद ५

शरात्रं संवत्सरं वैकऋषिर्जयति नऽग्नेचारेतन्नतः सूर्यावित्वेवधूवरञ्चेदाचार्यब्रा
ह्मणेभ्योथस्वस्त्ययनंवाचयीत ॥८॥ पाणिग्रहणादेरत्यंपरिचरेत्स्वयंपत्न्यापिवा
पुत्रःकुमार्यंतेवासीवाग्नित्यानुग्रहीतस्याथदितूपवसेद्दत्सेकेतस्या
ग्निहोत्रेणप्रादुष्करणहोमकालेव्याहृतीर्होम्यंचमांसवर्जंकामंनुब्रूहियवानेत्ते
ग्नयेस्वाहेतिसायंजुहुयात्सूर्यायस्वाहेतिप्रातस्तूष्णींद्वितीयेउभयत्र ॥९॥ अथ
पार्वणस्थालीपाकस्यदर्शपूर्णमासाभ्यामुपवासइध्माबर्हिषोश्वसंनहनंदेवता
श्चोपांशुयाजेइमेहेद्रवर्जंकाम्याइतरासुस्येतस्येदेवतायेचतुरश्चतुरोमुष्टींनिर्वप
तिपवित्रेअंतर्धायामुष्मैत्वाजुष्टंनिर्वपामीत्यथैनान्प्रोक्षतिययाग्निरुत्तममुष्मै
त्वाजुष्टंप्रोक्षामीत्यवहनांस्त्रिःफलीकृताभावाभ्रपयेत्समोप्यवायदिनानाभ्रपये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समोप्यवोयस्तानाश्रपयेद्विभज्यतंडुलानभिमृशेदिदममुष्माइदममुष्माऽइति
यद्वैसमोप्यव्युद्धारंजुहुयाच्छृतान्हवींष्यभिघार्येदिगुद्धास्यबर्हिष्यासाद्यत्रत्याभि
घार्यैधममभिघार्ययंतइध्मऽआत्माजातवेदस्तेनेध्यस्यवर्धस्वचेद्धवर्द्धयचास्मान्प्र
जयापशुभिर्ब्रह्मवर्चसेनान्नाद्येनसमेधयस्वेहरंतेतूष्णीमाघारावाघार्यज्यभागौजुहु
यादग्नयेस्वाहासोमायस्वाहेत्यन्तरमाग्नेयंदक्षिणंसोम्यंविज्ञायतेचक्षुषीवाएतेयज्ञ
स्यदाज्यभागौतस्मात्पुरुषस्यप्रत्यङ्मुखस्यासीनस्यदक्षिणमक्ष्युत्तरंभवत्युत्तरं
दक्षिणंमध्येहवींषिप्रत्यक्तरंवाग्नाक्संस्थान्युदक्संस्थाग्नेवोत्तरतस्तांत्सोविष्ट
कृतंमध्यात्पूर्वार्धाच्चहवेषोवघातंमध्यात्पूर्वार्धात्सश्चाधीतंपंचावत्तिनोत्तरा
र्धात्सोविष्टकृतंनावहवींषिप्रत्यभिघारयतोत्तिष्टकृतंद्वरभिघारयतेयदस्यकर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णोत्यरीरिचंयद्वान्यूनमिहाकरं॥अग्निष्टत्स्विष्टकृद्विद्यात्सर्वंस्विष्टंसुहुतंकरोतुमे॥
अग्नयेस्विष्टकृतेसुहुतहुतेसर्वप्रायश्चित्ताहुतीनांकामानांसमर्द्धयित्रेसर्वाभिःकामा
न्त्समर्धयस्वाहेतेनैवाहौषंपूर्णपात्रंनिनयेद्दर्षोवभृथः पाकयज्ञानामेतत्तंत्रंहविरुच्छि
ष्टदक्षिणा॥१०॥अथपशुकल्पउत्तरतोग्नेःशमित्रस्थायतनंकृत्वापाक्यंयित्वापशुमा
लभ्यपुरस्तात्स्रुवमवरुह्याग्नेंदूतमितिद्वाभ्यांहुत्वासपलाशयाद्रेशारवया
पश्चादुपस्पृश्योदमुंभेत्वाजुष्टमुपाकरोमीतित्रीहियवमतीभिरद्भिःपुरस्तात्प्रोक्षत्यमु
ंभेत्वाजुष्टंप्रोक्षामीतितासांपाक्यंयित्वादक्षिणमनुबाहुंशेषंनिनयेदाहवनीयेवपर्याग्नि कृ
त्वोदंचंनयंतितस्यपुरस्तादुल्मुकंहरंतेशमित्रएषभवतेवपाश्चपलीभ्यांकर्त्तापशुम
न्वारभतेकर्त्तारंयजमानःपश्चाच्छमित्रस्याक्रूशिरसंप्रत्यक्रूशिरसंवोदक्पादंसंज्ञ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रथम पटल

थ्पुरानाभेरुत्तरमंतर्धायैवपासुरत्खेद्यवपामवदायवपाश्रपणीभ्योपरिगृह्याग्नेरग्नि
षिच्यन्नागमित्रेप्रताप्यायेणेनमग्निंहृत्वादक्षिणतऽआसीनःश्रपयित्वापरीत्यजुहुयाद्
तस्मिन्नेवाग्नौरुजाल्लीपाकंश्रपयंत्येकादशपशोरवदानानिसर्वांगेभ्योवदायन्नागमित्रे
श्रपयित्वाहृदयंशूलेप्रताप्यरुजाल्लीपाकस्याग्नौजुहुयादवदानेवसिहैकैकस्यावदा
नस्याहुर्हुरवद्यत्याइतेवहृदयशूलेनचरंति॥११॥चित्रयज्ञेनाकुस्विष्टकृतश्चेत्या
यबालिंहरेद्यकेवेविदेवारुंपलाशदूतेनयत्रवेत्थवनस्पतइत्येतयाचाहुतीर्जुहोतिपिंडोकृत्वा
वीवधेभ्याधायदूतायप्रयच्छेदिमंतस्मेबालिंहरेतेचेनंब्रूयादयंतुभ्यमग्नियोदूतायप्र
हिभयंचेदंबराज्ञोरुत्रमापिकंचिभाव्याचेद्यंनंतरापुरुषरूपेमापाकंचिदनेनतारयतव्य
मितिधन्वंतरियज्ञेब्रह्मागमग्नेंचांतरापुरोहितायाग्नेबालिंहरेत्॥१२॥उपानषद्

एम
७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गर्भलंभनंपुंसवनमनवलोभनंचयद्दिनाधीयात्तृतीयेगर्भमासेतव्येणेपोषितायाः
सरूपवत्सायागोर्दधिनिहोहोतुमाषौषवंचदधिप्रसृतेनप्राश्नीयात्किंपबासिकिंपिब
सीतिपृष्ट्वापुंसवनंपुंसवनामतोत्रिःप्रतिजानीयादेवंत्रीन्प्रसृतानथास्येमंउत्तरा
रछायायांदक्षिणस्यांनासिकायांमजीतामोषधीन्तस्करोतिप्रजावज्जीवपुत्राभ्यां
हैके॥आतेगर्भोयोनिमेतुपुमान्बाणइवेषुधिं॥आवीरोजायतांपुत्रस्तंदशमास्यः॥
अग्निरैतुप्रथमोदेवतानांसोस्येप्रजांमुंचतुमृत्युपाशात्॥तदयंराजावरुणोनुमन्य
तांयथेयंस्त्रीपौत्रमघंरोदात्दिनिप्राजापत्यस्यरुजातीपाकस्यहुत्वाहृदयदेशमस्याउ
आलभेतयत्तेसुशीमेहृदयेहृतमंतःप्रजापतौ॥मन्येहंमांतद्वीरंसमाहंपौत्रमघंभि
यागमिति॥१३॥चतुर्थेगर्भमासेसीमंतोन्नयनमापूर्यमाणपक्षेयदापुंसानक्षत्रेणचंद्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मायुक्तस्यादथाग्निमुपसमाधायपश्चादग्नानुहंचर्मस्तीर्यप्राग्ग्रीवमुत्तरलोमन्यस्मि
न्नुपविष्टायांसमन्वारब्धायांधातादददामुष्यइतिह्राभ्यांराकामहमितिह्राभ्यांनेजमेष
प्रजापतेनत्वदेतान्यन्यइतिचाथास्येयुग्मेनग्रालाद्गुल्फेनत्र्येण्याचग्रालल्याग्रेभिश्च
कुशपिंजूलैरूर्ध्वंसीमंतंव्यूहतिभूर्भुवःस्वरोमितित्रिश्चतुर्वीणागागायिनोसंशास्ति
सोमंराजानंसगायेतामितिसोमोनोराजावतुमानुषीःप्रजामनिविष्टचक्रासावितयो
मदीमुपवासयाभवंनेब्राह्मण्यश्चदृद्धाजीवपत्योजीवप्रजायद्युपदद्रेयुस्तत्तथाकुर्यु
रृषभोदक्षिणा॥१४॥कुमारंजातंपुरोन्येरालंभात्सर्पिर्मधुनीहिरण्यानिकांस्योहिरण्ये
नग्राज्येस्रुतेदद्यादिमधुनोघृतस्यवेदंसर्विचाप्रसूतंमघोनां॥आयुष्मान्गुप्तोदेवता रम्
भिःशतंजीवशरदोलोकेअस्मिन्शतंकृणवोरुपनिधायमेधाजननंजपतेमेधांतेदे ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वः सवितामेधांदेवीसरस्वती॥ मेधांतेऽअश्विनोदेवावाधत्तांपुष्करस्रजौ॥ विसंसाव
भिमृश्यत्र्यंबमाभवपरसुर्भवहिरण्यमस्तृतंभव॥ वेदौवैपुत्रनामासिसजीवशरदःश
तमंनंदिष्ठेऽग्निद्रविणानिधेत्यसेऽग्रंधिमघवन्गृजीषान्नातिचनामचास्मेदघो
षवदाघंतरंतस्मभिनिष्टानांतेव्यक्षरंचतुरक्षरंवाव्यक्षरंऽग्निष्टाकामश्चतुरक्षरं
ब्रह्मवर्चसकामोयुग्मानित्सेवपुंसामयुजानिस्त्रीणामभिवादनीयंचसमीक्षेततन्मा
तापितरौविधानामोपनयनात्प्रवासादेत्यपुत्रस्यशिरःपरिगृह्यजघ्रेसंगादंगात्संभव
सिहृदयादधिजायसे॥ आत्मावैपुत्रनामासिसजीवशरदःशतमितिमूर्धन्नेनंरव
घायादेवंकुमार्यै॥१५॥ षष्ठेमास्यन्नप्राशनंमाजमन्नाद्यकामस्यैनंब्रह्मवर्चसका
मोघृतौदनंतेजस्कामोदधिमधुघृतमिश्रमन्नंप्राश्नीयादन्नपतेन्नस्यनोदेह्यनमीवस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुष्मिणः॥ अप्रदातारंतारिषऽर्जिनोधेहीहूपदेचतुष्पदइत्याहनेवकुमार्ये॥१६॥तृ
तीयेवर्षेचौलंयथाकुलधर्मंचोत्तरतोग्नेर्ब्रह्मेहिषवमाषतिलानांपृथक्पूर्णञ्जरावाग्ल
निदधातिपश्चात्कारयिष्यमाणोमासुरूपरूऽआनडुहंगोमयंनवेञ्जरावेञ्जमीपर्ण
निचोपनिहत्यानेभवंतिमातुःपितादक्षिणतःएकावेञ्जरातेकुशपिंजूलान्यादायब्र
ह्मावेतानिधारयेत्पश्चात्कारयिष्यमाणस्यावरुजायत्रीनोच्छाऽअपःसमानीयोच्छे
नवायउदकेनेहीतेतासांगृहीत्वानवनीतंदधिघृक्त्वान्वाग्दक्षिणंञ्जरास्त्रिरुदंत्य
हितेःकेशान्वपतापउंदंतुवर्चसइतिदक्षिणेकेशपक्षेत्रीणित्रीणिकुशपिंजूलान्य
भ्यात्मात्रीणिनिदधात्योषधेत्रायस्वैनंस्वधेतेमेनंहसोरक्षतंलोहितस्करेणग्राछि
नत्तियेनावपत्सवितास्तुरेणसोमस्यराज्ञोवरुणस्यबाहूभ्यांपूष्णोहस्ताभ्यांनेनब्रह्मणोवपनेद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मस्यायुष्मान्जरदष्टिर्यथासद्दंनेभ्रछिद्रश्रछिद्रपाण्यान्छमीपर्णैः सहमात्रेभ्र
यछंतेनानानुहेगोमयेनदधातेयेनधातावृहस्पतेरग्नेरिंद्रस्यचायुषेवपन्॥ते
नतऽआयुषेवपामिसुश्लोक्यायस्वस्तयइतिहनीयं॥येनभूयश्चराच्यांज्योक्चेप
श्यानसूर्यं॥तेनतऽआयुषेवपामिसुश्लोक्यायस्वस्तयइतिनृतीयंसवैमित्रेश्चतु
र्थमेवमुत्तरंतास्त्रिक्षरंतेजोनिमृजेयत्क्षुरेणमर्चयतासुपेशसावतावपासिकेशान्
॥शुंधिशिरोमास्यायुःप्रमोषीरितिनापितंशेष्वाशीतोष्णाभिरद्भिरवर्थंकुर्वाणोस्
एवन्कुशलीकुर्वीतयथाकुलधर्मकेशवेशान्कारयेदाहृतेवकुमार्यै॥१७॥एतेनगो
दानंषोडशोवर्षकेशश्मश्रुशब्दान्कारयेच्छ्मश्रूणीहोदरंतेशुंधिशिरोमुखंमास्या
युःप्रमोषीरितिकेशश्मश्रुलोमनखान्युदकंसंरुजानिकुर्वंतेसंप्रेष्यत्यापुत्यवाग्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मिन्नाह: शेषमाचार्यसकाशेवाचंविसृजेतवरंदद्यान्नगोमिथुनंदक्षिणासंव
त्सरमादिशेत्तु॥१८॥अथैमंवर्षेब्राह्मणमुपनयेन्नभीष्मेवैकादशेराजन्यंद्वादशे
वैश्यमाषोडशेवाब्राह्मणस्यानतीत्तःकालःआहावैशतात्क्षत्रियस्याचतुर्विंशाद्वैश्य
स्यानऊर्ध्वंपतितसावित्रीकाभवंतितेनानुपनयेन्नाध्यापयेन्नयाजयेन्नैभिर्यव
हेयुरलंकृतंकुमारंकुशलीकृतशिरसमहतेनवाससासंवीतमेरेयेनवाजिनेनब्रा
ह्मणंरोरवेणक्षत्रियमाजिनेवैश्यंयद्दिवासांसिवसीरन्नक्लानिवसीरन्काषायंब्रा
ह्मणोमाञ्जिष्ठंक्षत्रियोहारिद्रंवैश्यस्तेषांमेखलामोंजीब्राह्मणस्यधनुर्ज्याक्षत्रिय
स्यावीवैश्यस्यतेषांदंडाःपालाशोब्राह्मणस्यौदुंबरःक्षत्रियस्यबैल्वोवैश्यस्यकेश्य
संमितोब्राह्मणस्यललाटसंमितःक्षत्रियस्यनासिकासंमितोवैश्यस्य॥१९॥सर्ववास

राम्
१०

भवत्पूर्वं ब्राह्मणो भिक्षांयाचेत भवन्मध्यां राजन्यो भवदंत्यां वैश्यः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैषांसमन्वारब्धेहुत्वोत्तरतोग्नेः शाङ्खुरवआचार्येनिषीदतेपुरस्तात्स्त्यङ्खुरवद्
नरोपामंजलीपूरयित्वातत्सवितुर्वृणीमहइतिपूर्णेनास्यपूर्णमवक्षारइत्यासिच्य
देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्ण्होहस्ताभ्यांहस्तंगृह्णाम्यसाविति त
स्यपाणिनापाणिंसांगुष्ठंगृह्णीयात्सवितातेहस्तमग्रभीदसाविति द्वितीयमग्निरा
चार्यस्तवासाविति तृतीयमादित्यमीक्षयेद्देवसवितरेषतेब्रह्मचारिनंगोपायसमा
मृतेत्याचार्यः कस्यब्रह्मचार्यसि प्राणस्यब्रह्मचार्यसिकस्त्वाकमुपनयतेकायत्वापरि
ददामीतियुवासुवासाः परिवीत आगाद्इत्यर्धर्चेनेनंप्रदक्षिणमावर्तयेत्तस्याध्यंसो
पाणीकृत्वाहृदयदेशमालभेतोत्तरेणाग्निंपरिसमुह्यब्रह्मचारिवूर्ष्णींसमिधमाद्धा
वूर्ष्णींवै प्राजापत्यंप्राजापत्योब्रह्मचारीभवतीतिविज्ञायते॥२०॥ मंत्रेणैहैकेग्नयेस

य २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिधमाहार्षंबृहतेजातवेदसे॥तथात्वमग्नेवर्धस्वसमिधाब्रह्मणाचयंस्वाहेतेस
मिधमाधायाग्निमुपस्तृण्यमुखंग्निमार्ङ्गिरसेजसामासमनज्मीतेतेजसात्मेवात्मा
नंसमनक्तीतिविज्ञायते॥मयिमेधांमयिप्रजांमय्यग्नित्तेजोदधातु॥मयिमेधांम
यिप्रजांमयीन्द्रइंद्रियंदधातु॥मयिमेधांमयिप्रजांमयिसूर्योभ्राजोदधातु॥यत्तेअ
ग्नेतेजस्तेनाहंतेजस्वीभूयासं॥यत्तेअग्नेवर्चस्तेनाहंवर्चस्वीभूयासं॥यत्तेअग्नेहर
स्तेनाहंहरस्वीभूयासमित्युपरुध्यजान्वाचोपसंगृह्यब्रूयादधीहिभोः सावित्रीभो
३अनुब्रूहीतितस्यवाससापाणिभ्यांचपाणीसंगृह्यसावित्रीमन्वाहपल्ल्योर्धचैत्रः
सर्वंयथान्यङ्कंवाचयीतहृदयदेशेसव्येधांगुलेपाणिमुपदधातिममव्रतेतेहृदयंते
दधामिममाचित्तमनुचित्तंतेअस्तु॥ममवाचमेकव्रतेजुषस्वबृहस्पतिष्ट्वानियु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकुमत्यभिनि॥२१॥मेखलामाबध्यदंडंप्रदायब्रह्मचर्यमादिशेद्भूरब्रह्मचार्यस्यपोशान
कर्मकुरुदिवामास्वाप्सीराचार्याधीनोवेदमधीष्वेतिहादशरात्रंषडिंगवेदब्रह्मचर्यग्रह
णांतंवासायंप्रातर्भिक्षेतसायंप्रातःसमिधमादध्यादग्न्याख्यायिनमग्नेभिक्षेतान्न
याख्यायिनीवाभवान्भिक्षान्ददात्वित्यनुप्रवचनीयमितिवातदाचार्यायिवेदयीतततेह
दहःशेषमस्तमितेब्रह्मौदनमनुप्रवचनीयंश्रपयित्वाचार्यायवेदयीताचार्यःसमन्वा
रब्धेजुहुयात्सदसस्पतिमद्भुतमितिसावित्र्याद्वितीयंयघ्लंचातऊर्ध्वमनूक्तंस्याद्ऋषि
व्यस्तृतीयंसौविष्टकृतंचचतुर्थंब्राह्मणान्भोजयेत्तावेदसमाप्तिंवाचयीतातऊर्ध्वमक्षा
रालवणाशीब्रह्मचार्यधःशायीत्रिरात्रंद्वादशरात्रंसंवत्सरंवाचरित्रत्रायमेधाजन
नंकरोत्यनिंदितायांदिश्येकमूलंपलाशंकुशस्तंबंवापलाशंपचारेदक्षिणमुदकं

इयंदुरुक्तात्परिबाधमाना वरेण्यं पुनती न आगात॥ प्राणापानाभ्यां बलमा भरंती वि-
श्वा देवानां सुभगा मेखले यं॥ ऋतस्य गोप्त्री तपसः परस्वी घृतीरेदाः सहमाना अरातीः॥
मानः समस्मै मनुषेरिह ग्रहे मा रसे मेखले मारिषाम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेनत्रिः परिषिंचंत्संवाचयंत्सुश्रवः सुश्रवा आसेयथात्वंसुश्रवः सुश्रवा अस्येवंमांसु
श्रवः सौश्रवसंकुरु॥यथात्वंदेवानांयज्ञस्यानिधपोस्येवमहंमनुष्याणांविदस्यानिधि
पोभूयासमित्येतेनवापनादिपरिहानांतंत्रनादेशनंव्याख्यातमित्यनुपेतपूर्वस्यायोपे
तपूर्वस्यकृताकृतंकेशवपनंमेधाजननंचाग्निरुक्तंपरिहानंकालश्चतत्सावित्रीगीम
हइतिसावित्री॥२॥ऋत्विजोवृणीतेन्यूनानतिरिक्तांगान्येमात्रतःपितृतश्चेतियथो
क्तंपुरस्ताच्चनऋत्विजोवृणीतइत्येकेब्रह्मत्वमेवप्रथमंवृणीतेथहोतारमथाध्वर्युमथो
द्गातारंसर्वान्वायेहीनेकोहेयजियंतिसदस्यंसप्तदशंकोषीतकिनःसमामनंतिसकर्म
णामुपद्रष्टाभवतीतिनदुष्कमृग्भ्योयमृत्विजोबहुधाकल्पयंतइतिहोतारमेवप्रथमं
वृणीतेग्निमेहोतासमेहोतोहोतारंत्वामुवृणइतिहोतारंचंद्रमामेब्रह्मासमेब्रह्मोब्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मणंत्वामुद्गृणन्नग्निब्राह्मणमादित्योमेध्वर्युरित्यध्वर्युपर्जन्योमह्लादातेस
ह्लातारमापोमेहोत्राश्रंसिन्यइतिहोत्रकान्नइमयोमेचमसाध्वर्यइतिचमसाध्वर्यूना
कांशोमेसदस्यइतिसदस्यंसदृनोजपेन्महन्मेवोचोभगोमेवोचोभगोमेवोचोयज्ञो
मेवोचःस्तोमंमेवोचःकृष्टिंमेवोचोभुक्तिंमेवोचस्तुतिंमेवोचःसर्वंमेवोचइतिजपित्वा
ग्निष्टेहोतासतेहोतोहोताहंतेमानुषइतिहोतोग्नेजानीतेचंद्रमासेब्राह्मासतेब्रा
ह्मबंधवेमनरेवथादर्शोनन्मामवलुनन्मावित्रंतुतेनभुक्षिषीयेतिचयाजयेद्यन्य
स्मात्वैज्यमकार्यमहीनस्यनीचदक्षिणस्यव्याधितस्यातुरस्ययक्ष्मगृहीतस्यानुदे
श्यभिशस्तस्यक्षिप्तयोनेरितिचैतेषांसोमश्वाकंपरिदृष्टेकोयज्ञःकऋतेजःकाद
क्षिणेतिकल्याणैःसहसंप्रयोगोचमांसमश्नीयुर्नरस्त्रियमुपेयुरात्रतोरपवर्गादितेना

तन्मा जिन्वतु ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेब्रह्मणावावृधस्वेतिदक्षिणाग्नावाज्याहुतिंहुत्वायथार्थंप्रव्रजेद्देवमनाहिताग्निर्गृह्य
इमामग्नेशरणिंमीमृषोनइत्येतयर्चा॥२३॥ऋत्विजोवृत्वामधुपर्कमाहरेत्स्नातकायोप
स्थितायराज्ञेचाचार्यश्वशुरपितृव्यमातुलानांचदधिमध्वानीयसर्पिर्वामिश्रलाभेवि
ष्टरःपाद्यमर्घ्यमाचमनीयंमधुपर्कोगौरित्येनेषांनामस्त्रेरेकैकंवेदयंते॥अहंवर्ष्मसजा
तानांविकर्तामिवसूर्यः॥इदंतमग्धेतपसामेयोमाकश्चाभिदासतीत्यदग्नेर्वेश्वरुप
विद्रोहक्रम्यवापादौप्रक्षालापयीतदक्षिणमग्रेब्राह्मणायप्रयच्छेत्सव्यंशूद्रायप्रक्षाल्य
तपादौर्घ्यमंजलिनाप्रतिगृह्याथाचमनीयेनाचामत्यमृतोपस्तरणमसीतिमधुपर्कमा
हियमाणमीक्षतेमित्रस्यत्वाचक्षुषाप्रतीक्षइतिदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहु
भ्यांपूष्ण्होहस्ताभ्यांप्रतिगृह्णामीतितंदंजलिनाप्रतिगृह्यसव्येपाणेकृत्वामधुचाता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋतायनइतिनृचेनावेक्ष्यानामिकयाचांगुष्ठेनचक्षुषीःप्रदक्षिणमालोड्यवसवस्त्वागा
यत्रेणछंदसाभक्षयंतितेपुरस्ताज्जिमाष्टिरुद्रास्त्वोत्रेष्टुभेनछंदसाभक्षयंतितेदक्षि
णतआदित्यास्त्वाजागतेनछंदसाभक्षयंतितेपश्चाद्विश्वेत्वादेवाआनुष्टुभेनछंद
साभक्षयंतित्वक्षरतोभूतेभ्यस्त्वेतेमध्याज्जरुद्भ्यविराजोदोहोसीतिप्रथमंप्राश्नी
याद्विराजोदोहमश्नीयेतेहूत्तीयंभूयेदोहःपद्योयेविराजइतितृतीयंनसर्वंनिलासं
गछेद्धुत्वाहरणायोदङ्मुखउच्छिष्टंप्रयच्छेदलाभेप्यकृसर्वंवाथाचमनीयेनाचम्यमृता
पिधानमसीतिसत्यंयज्ञःश्रीर्मयिश्रीःश्रयतामितिहूतीयमाचांतोदकायगांवेदयं
तेहतोमेपाप्माापाप्मामेहतइतिजपित्वोंकुरुतेकारयेद्यन्मानारुद्राणांदुहितावसू
नामितिजपित्वोमुत्सृजतेयुत्सक्ष्यन्भामांसोमधुपर्कोभवतिभवति॥२४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति गृह्यसूत्रे प्रथमोध्यायः ॥ ॥ हरिः ओ३म् ॥ श्रावण्यांपौर्णमास्यांश्रवणाक
र्क्षिनसक्तूनांचकलशंपूरयित्वादर्विंचबलिहरणंचवेश्यैनिदधात्यक्षतधानाः
कृत्वासर्पिषार्घाऽअनन्वयलोमेवेरुडालीपाकंश्रपयित्वैककपालंचपुरोळाश्मग्नेन
यसुपथारायेऽअस्मान्नितेचत्तसृभिः प्रत्यृचंहुत्वापालिनेकपालमच्युताय भौमाय
स्वाहेत्यच्छुतस्यादाग्नेयः पृष्ठोवामानोऽअग्नेवसूजोअधायेत्येनमाश्रायेनाभिजुहो
तिशंनोभवंतुवाजिनोहवेष्वित्यक्षधानाञ्जलिनामात्येभ्यऽइलरादधात्कलशाद्
क्तूनादर्विंपूरयित्वाप्रागुपनिष्क्रम्यशुचौदेशेपोवनीयसर्पदेवजनेभ्यः स्वाहेतिहु
त्वानमस्करोतीयेसर्पाः पार्थिवायऽआंतरिक्ष्यायेदिव्यायेदृश्यास्तेभ्यऽइमंबलिमाहा
र्षंतेभ्यऽइमंबलिमुपाकरोमीतिप्रदक्षिणंपरीत्यपश्चाद्बलेरुपविश्यसर्पेभ्यसर्पतांस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्णामाधिपतिरस्येनेनमनुष्यांस्त्रायसेपूषेनसपत्न्यैनदेवांस्त्वयिमासंतंत्वयि
संतःसर्पमाहिंसिषुर्ध्रुवांतेपरिददामीतेध्रुवामुतइत्यमात्मानमनुपूर्वंध्रु
वमांतेपरिददामीत्यात्मानमंततोनैनमंतराव्यथेयुरपरिदानात्सर्पदेवजनेभ्यःस्वा
हेतिसायंग्रानर्बलिंहरेदाग्नेयवरोहणात्प्रसंख्यायहेकेतावतोबलींस्तदहरेवोपहरं
ति॥१॥आश्वयुज्यामाश्वयुजीकर्मणेवेशनमलंकृत्यस्नाताःशुचिवाससःपशुप
तयेरुद्रायीपाकंनिरूप्यजुहुयुःपशुपतयेरुद्रायशंकरायकृषानकायस्वाहेतेकृ
षानकमंजलिनाजुहुयादूनंमेपूर्यतांपूर्णमेमोपसदत्कृषानकायस्वाहेतेसजूर्ऋतु
भिःसजूर्वधाभिः॥सजूरिंद्राग्नेभ्यांस्वाहा॥सजूर्ऋतुभिःसजूर्वधाभिःसजूर्विश्वे
भ्योदेवेभ्यःस्वाहा॥सजूर्ऋतुभिःसजूर्वधाभिःसजूर्द्यावापृथिवीभ्यांस्वाहेत्याहा

नाग्नेराग्नयणस्थालीपाकोनाहिताग्नेरग्नयणलाग्नो॥२॥ मार्गशीर्ष्यांप्रित्यवरोहणं
चतुर्दश्यांपौर्णमास्यांवाग्नेयेनानुनर्वीकृत्यलेपनास्तरणोपस्तरणेसस्तमितेपा
यसस्यजुहुयुरपश्वेतपदाजाहिपूर्वेणचापेरणच॥ सतचवारुणीरिमाःसवश्चिराज
वांधवीस्वाहा॥ नेवेश्वेतश्वाध्यागारेहर्जघानकिंचन॥ श्वेतायवेदावयिनमःस्वाहे
तिनात्रसोविष्टकृदभयन्नःप्राजापत्येभ्योभूयादित्याग्नमीक्षमाणोजपतीशेवोनःसु
मनाभवेतिहमंतंमनसाध्यायत्पश्वादग्नेस्वस्तरःस्वास्तीर्णस्तास्मिन्नुपविश्यस्योना
पृथिवीभवेतिजपित्वासंवेशेत्सामात्यःप्राकूशिराउदङ्मुखोयथावकाशमितरे
ज्यायांज्यायान्वानंतरोमंत्रविदोमंत्रान्जपेयुःसंहायतोदेवाअवंतुनइतोत्रेतां राम्
दक्षिणासुखाःप्रत्यङ्मुखाउदङ्मुखाश्चतुर्थेसंहायसोयागिरस्वस्त्ययनाग्निचज १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पित्राग्नंसंस्कृत्यब्राह्मणान्भोजयित्वास्वस्त्ययनंवाचयीत॥३॥हेमंतशिशिरयो
श्चतुर्गृहीतपरपक्षाणामष्टमीष्वष्टकारेकस्यांवापूर्वेद्युः पितृभ्योदद्याद्दोदनंकृसरंप
यसंचतुःशरावस्यवापूपान्दीरनामवरउत्तरासइत्यष्टाभिर्हुत्वायावतीभिर्वाकाम
यीतापश्वोभूयिष्ठाः पशुनारब्धालीपाकेनचाथनडुहोयवसमाहरेदग्निनावाकल्प
नुपोषेदेषामेष्टकेतिनत्वेवानष्टकस्यांहैकेवैश्वदेवींब्रुवतआग्नेयीमेकेसोयीमेके
प्राजापत्यामेकैरात्रेदेवतामेकेनक्षत्रदेवतामेकऋतुदेवतामेकेपितृदेवतामेकेपशु
देवतामेकेपशुकल्पेनपशुंसंज्ञप्यप्रोक्षणेपाकरणवर्जंवपामुत्खिद्यजुहुयाद्वहवपां
जातवेदःपितृभ्योयत्रैनान्वेत्याग्नेहिताम्पुरामेकेहसःकुल्याउपेनान्स्रवंतुसत्याएता
आशिषःसंतुसर्वाःस्वाहेत्यथावदानानांस्थालीपाकस्यचाग्नेयस्यपथारायेऽस्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्तिहेत्योष्मोहेमंतश्चरुवःशिवानोवर्षाःशिवाऽअभयाःशरभः॥संवत्सरोऽधिपतिः
प्राणदोनोहोरात्रेकृणुतांदीर्घमायुःस्वाहा॥शंतापृथिवीशिवमंतरिक्षंद्यौनोदिव्यभं
यंनोऽअस्तु॥शिवादिशःप्रदिशःउद्दिशोनआपोविद्युतःपरिपांतुसर्वतःस्वाहा॥आ
पोमरीचीःप्रवहंतुनोऽघयोधातासमुद्रोवहंतुपापं॥भूतंभविष्यद्भयंविश्वमस्तुमे
बलाधिगुप्तःस्वाराक्षरालिस्वाहा॥विश्वेआदित्यावसवश्चदेवारुद्रागोमारोमरुतः
सदंतु॥ऊर्जंप्रजाममृतंपिन्वमानःप्रजापतेर्मयिपरमेष्ठीदधातुस्वाहा॥प्रजापतेन
त्वदेतान्यन्यःसोविश्वकृत्यश्मीब्राह्मणान्भोजयेदित्युक्तं॥४॥अपरेफरन्वश्वत्थेन
स्रेवमांसस्यप्रकल्प्यदक्षिणाग्रवेऽग्निमुपसमाधायपरिस्तृत्योत्तरतःपरिस्तृत
स्यद्वारंकृत्वासमूलंबर्हिस्तिरःपवित्रैरविधून्वन्परिस्तीर्यहवींष्यासादयेदोदनंकृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्पायसंदधिमंथान्मधुमंथांश्चपिंडपितृयज्ञकल्पेनहुत्वामधुमंथवर्जंपितृभ्यो
दद्यात्स्त्रीभ्यश्चसुरांचाचामयित्वाधिकंकर्षूष्वेकेढ्योःषट्सुवापूर्वासुपितृभ्योदद्या
दपरासुस्त्रीभ्यएतेनमाध्यावर्षंश्रोष्ठपदाअपरपक्षेमासिमासिचैवंपितृभ्योयक्षुभ्र
तिष्ठापयेन्नवावरान्भोजयेदयुजोवायुग्मान्गृह्यपूर्वेष्वियुग्मानितरेषुप्रदक्षिणमु
पचारोयेवैस्तिलार्थेः॥९॥रथमारोक्ष्यमाणापाद्भ्योंचकेअभिमृशेदहंतेपूर्व
पादावारभेद्धृदयंनरेतेचक्रेवामदेव्यमक्षइत्यक्षाधिष्ठानेदक्षिणपूर्वाभ्यामारोहे
द्वायोष्टावीर्येणारोहामींद्रस्योजसाधिपत्येनेतरन्मीन्त्संमृशेरथमक्षान्वादंडेनब्र
ह्मणोवस्तेजसासंगृह्णामिसत्येनवःसंगृह्णामीत्यभिप्रवर्त्तमानेषुजपेत्सहस्रशतंने
राजमभिवर्त्तस्वयदेवप्रवतोनस्पतेवीडुंगोहिभूयाइत्येनयान्यान्यपवानस्येत्यानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृ०सू०२
१७

स्त्रिरोगावोभवतांवीरुरक्षइतिरथांगमभिमृशेत्सुत्वामारोहृथिवींधामनेहसाभि
तिनावेनवरथेनयज्ञास्त्वंवृक्षंहंचाविदासिनंप्रदक्षिणंकृत्वाफलवतीःशाखाग
आहरेदन्यहाकोटुंबंसंसदमुपयादस्माकमुत्तमंकृधीत्यादित्यमीक्षमाणोजपे
त्तावरोहेदृषभंमासमानानामित्यभिक्रामन्वयमद्येंद्रस्यप्रेष्ठाइत्यस्तंयात्यादित्येन
ह्येदवोदुहसरोविभातीरितिव्युषायांगृह्णाअथातोवास्तुपरीक्षानूखरमविवि
लुभूमोषाधिवनस्पतिवधास्मिन्कुशाशीरिणंप्रभूतंकंराक्षीरिणस्तुसमूलान्यरि
ष्वायोहासर्षेदपामार्गःशाकस्तिल्वकःपरिव्याधइतिचैतानिनयत्रसर्वत्रआपोमध्ये
समेत्यप्रदक्षिणंशायनीयंपरीत्यप्राच्यस्यंन्देरभ्रवदत्यस्तत्सर्वंसमूहंसमवस्त्र
वेभक्षशरणंकारयेद्धूकन्नेहभवतिदक्षिणाग्रवलेसंभामापयेत्साधूनाहभवतियु

राम्
१७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वानस्तस्यांकिलवाः कलहिनः प्रमाणुकाभवंतियत्रसर्वतआपः प्रस्यंदेरन्त्सास
स्रुयन्यघृतावा ॥ ७ ॥ अथैतेवालुपरीक्षेतजानुमात्रंगर्तंखात्वातेरेवपांसुभिः
प्रतिपूरयेद्दधिकेप्रवास्तंसमेवार्त्तन्यूनेगर्हितमस्तमतेपांपूर्णंपरिवासयेत्सोद
केप्रवास्तमार्द्रंवार्तंशुष्केगर्हितंश्वेतंमधुरास्वादंसिकतोत्करंब्राह्मणस्यलोहितंक्ष
त्रियस्यपीतंवैश्यस्यतत्सहस्रसीतंकृत्वायथादिक्समंचतुरस्रंमापयेदायतंचतुर
स्रंवातच्छमीशमीखदिरपलाशोदुंबरशमीवाश्मंतकीयेनास्त्रेः प्रदक्षिणंपरिव्रजन्प्रोक्ष
त्यविछिन्नयाचोदकधारयापोहिष्ठामयोभुवस्तानऊर्जेदधातनमहेरणायचक्षसे
यस्तेशिवतमोरसस्तस्यभाजयेहाउशतीरिवमातरः प्रणआपइद्यवोभवतीतिवेज्ञायतेमध्यमस्यूणा
यागर्तेवधायप्रागग्रोदगग्रान्कुशानास्तीर्यत्रीहियवमतीरपआसेचयेदच्युतायभो

मायस्वाहेत्यथैनामुच्छीयमाणामनुमंत्रयेतेहेवतेष्ठानमित्यातल्वलास्तामरा
वतीमध्येपोषस्वनिष्ठंतीं॥आत्वाग्रापद्मघायवंऽआत्वाकुमारस्तरुणआवत्सोजा
यतांसह॥आत्वापरिश्रितःकुंभआदध्नःकलशैरयम्भितः॥८॥वंशमाधीयमानमृ
तेनस्तूणमधरोहवंशाद्राधीयआयुःप्रतरंदधानाइतिसतूर्वासुतेचेसृजोल्लासु
मणिकंप्रतिष्ठापयेत्पृथिव्याअधिसंभवेत्यरंगरोबावदीतिनेथाबद्धोवरत्रया॥इ
रामुहप्रशंसत्यनिरामपबाधनामितेवायास्मिन्नपआसेचयेद्देतुराजावरुणोरे
वतीभिरास्मिंस्थानेतिष्ठतुमोदमानः॥इरांवहंतोघृतमुक्षमाणामित्रेणसाकंसह
संवेशंगत्वित्यथैनऽमयतेत्रीहियवमतीभिरमूहरिण्यमवधायशंतातीयेन
त्रिःप्रदक्षिणंपरिव्रजन्प्रोक्षत्यवोछिंनयाचोदकधारयापोहिष्ठामयोभुवःशंनऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चेनमध्येगारस्यस्थालीपाकंश्रपयेत्तावास्तोष्पतेप्रतिजानीत्यस्माञ्जितंच त
सृभिःप्रस्तरंहुत्वान्नंसंस्कृत्यब्राह्मणान्भोजयित्वाशिवंवारस्तुशिवंवास्त्विति
वाचयीत॥१॥उत्तरंगृहप्रपद्यतेबीजवतोगृहान्प्रपद्येतक्षेत्रंप्रकर्षयेदुत्तरैः प्रोष्ठ
पदैःफल्गुनीभारोहिण्यावाक्षेत्रस्यानुवातंक्षेत्रस्यपतिनावयमिंतेप्रस्तरंजुहुया
ज्जपेद्भागाःप्रतिष्ठमानाऽअनुमंत्रयेतमयोभूर्वातोअभिवातूस्राइंतेहाभ्यामा
यनीर्यासामूधश्चतुर्बिलंमधोःपूर्णंघृतस्यच॥तानःसंतुपयस्वतीर्बह्वीर्गोष्ठेघृ
ताच्यः॥उपमैतुमयोभुवऊर्जंचोजश्चबिभ्रतीः॥दुहानाऽअक्षितंपयोमयिगोष्ठे
निविशध्वंयथाभवाम्युत्तमः॥यादेवेषुतन्वमेरयंतेतेचसूक्तशेषमागावीयमेकेग
णाचासामुपतिष्ठेतागुरुगवीनांभूतारुप्रशस्ताःरुशोभनाःप्रियाःप्रियोवोभूया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संज्ञानमयेजानीध्वंज्ञानमयेजानीध्वं॥१०॥ ॥इतिगृह्यसूत्रेद्वितीयोध्यायः॥ ॥
हरिःओ३म्॥अथातःपंचयज्ञादेवयज्ञोभूतयज्ञःपितृयज्ञोब्रह्मयज्ञोमनुष्ययज्ञ
इतिनित्यदग्नौजुहोतिसदेवयज्ञोयद्बलिंकरोतिसभूतयज्ञोयत्पितृभ्योददातिस
पितृयज्ञोयत्स्वाध्यायमधीतेसब्रह्मयज्ञोयन्मनुष्येभ्योददातिसमनुष्ययज्ञइतिना
नेनान्यज्ञानहरहःकुर्वन्न॥१॥अथस्वाध्यायविधिःप्राग्वोदग्वाग्रामंनिष्क्रम्याप
आचम्यशुचौदेशेयज्ञोपवीत्याचम्यदर्भेणंमहदुपस्तीर्यप्राक्कूलानां
तेषुप्राङ्मुखउपविश्योपस्पृश्यदक्षिणोत्तरौपाणीसंधायपवित्रवंतौविज्ञायतेषां
वाएषओषधीनांरसोयद्दर्भाःसरसमेवतद्बलंकरोतिधावापृथिव्योःसंधमीक्ष
माणःसंमील्यवायथावायुक्तमात्मानंमन्येनतथायुक्तोधीयीतस्वाध्यायमोङ्कार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्याहृतयः सावित्रीमन्वाहपछोर्द्वर्चाः सर्वाभिरितृतीयं ॥२॥ अथस्वाध्यायमधीयी
तऋचोयजूंषिसामान्यथर्वांगिरसोब्राह्मणानिकल्पान्गाथानाराशंसीरितिहासपु
राणानीतियदधीतेपयआहुतिभिरेवतद्देवतास्तर्पयतियद्यजूंषिघृताहुतिभिर्यत्सा
मानिमध्वाहुतिभिर्यदथर्वांगिरसःसोमाहुतिभिर्यद्ब्राह्मणानिकल्पान्गाथानाराशं
सीरितिहासपुराणानीत्यमृताहुतिभिर्यदधीतेपयसःकुल्याअस्यपितॄन्त्स्वधाउ
पक्षरंतियद्यजूंषिघृतस्यकुल्यायत्सामानिमध्वःकुल्यायदथर्वांगिरसःसोमस्यकुल्या
यद्ब्राह्मणानिकल्पान्गाथानाराशंसीरितिपुराणानीत्यमृतस्यकुल्याःसयावन्मन्येत
तावदधीत्येतयापरिदधातिनमोब्रह्मणेनमोअस्त्वग्नयेनमःपृथिव्यैनमओषधीभ्यः
॥नमोवाचेनमोवाचस्पतयेनमोविष्णवेमहतेकरोमीति॥३॥देवतास्तर्पयतिप्रजाप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिर्ब्रह्मावेदादेवाऋषयःसवीरिछंदांस्योंकारोवषट्कारोव्याहृतयःसावित्रीयज्ञाधा
वाद्यथिवी अंतरिक्षमहोरात्राणिसंख्याःसिद्धाःसमुद्रानद्योगिरयःक्षेत्रौषधिवनस्प
तिगंधर्वाप्सरसोनागावयांसिगावःसाध्याविश्वायक्षारक्षांसिभूतान्येवमंतान्यथऋ
षयःशनर्चिनोमाध्यमागृत्समदोविश्वामित्रोवामदेवोत्रिर्भरद्वाजोवसिष्ठःप्रगाथाःपावमान्यः
क्षुद्रसूक्तामहासूक्ताइतिप्राचीनावीतीसुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्यभा
रतमहाभारतधर्माचार्याजानंतिबाहविगार्ग्यगोतमशाकल्यबाभ्रव्यमांडव्यमांडूके
यागशैवाचक्रवीवडवाप्रातीथेयीसुलभामैत्रेयीकहोळंकोषीतकंमहाकोषीतकंपैंग्यं
महापैंग्यंसुयज्ञंशांखायनमैतरेयंमहैतरेयंशाकलंबाष्कलंसुजातवक्त्रमोदवाहिं राम्
महोदवाहिंसोजामिंत्रयोनकमाश्वलायनंयेचान्येआचार्यास्तेसर्वेदृष्यंत्वितिप्रतिपु २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुषंपिवृत्लपीयित्वागृहानेत्यथद्दाग्नेसादक्षिणाथापिविज्ञायतेसयद्दनेष्टुन्नेज
भासीनःशयानोवायंयंक्रतुमधीतेतेनतेनहास्यक्रतुनेष्टंभवतीतिविज्ञायतेतस्यद्दा
वनध्यायेयदात्माशुचिर्यद्दाः॥४॥अथातोध्यायोपाकरणमोषधीनांप्रादुर्भावेश्रव
णेनश्रावणस्यपंचम्यांहस्तेनवाज्यभागौहुत्वाज्याहुतीर्जुहुयात्सावित्र्यैब्रह्मणेश्रद्धा
यैमेधायैप्रज्ञायैधारणायैसदसस्पतयेनुमतयेछंदोभ्यऋषिभ्यश्चेत्यथदधिसक्तून्जु
होत्यग्निमीळेपुरोहितमित्येकाकुर्षुंभकस्तद्ब्रवीदावदंस्तंशकुनेभद्रमावदगृणाना
जमदग्निनाधामंतेविश्वंभुवनमधिश्रितंगंतानोयज्ञंयज्ञियाःसुज्ञामियोनःस्तोअरणः
प्रतिचक्ष्वविचक्ष्वाग्नेयाहिमरुत्सखायस्तेराजन्छंतमवरंतेहचाःसमानीवआकूति
रित्येकातच्छंयोरावृणीमहइत्येकाध्येष्यमाणोध्यायैरन्वारब्धरताभ्योदेवताभ्योहुत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽविश्रकृतंहुत्वाद्धिसक्तून्प्राश्यततोभाजनेभपरेणाग्नेंभाक्तेषुदर्भेषूपविश्योदप
त्रेदर्भान्कृत्वाब्रह्मांजलिकृतोजपेदांपूर्वव्याहृतयःसावित्रींचैत्रिरभ्यस्यवेदादिमार
भेत्तथोत्सर्गेषण्मासानधीयीतसमाहितोब्रह्मचारिकल्पेनयथान्यायमिनरेज्यायोपवे
त्येकेप्राजापत्यंतद्वार्षिकमित्येतदाचक्षतेमध्यमाष्टकायमिताभ्योदेवताभ्योनेनहुत्व
योभ्यश्चयंत्येताएवदेवतास्तर्पयंत्याचार्यनिरीक्ष्यिदृश्चैतदुत्सर्जनं॥१९॥अथकाम्या
नांरूपाणेकाम्याश्चरवस्तानेवकामानाप्नोत्यथव्याधितस्यातुरस्ययक्ष्मगृहीतस्यवाष
ग्राहग्लिश्चरुंचरुमित्याहविषाजीवनायकमित्येतेनस्वप्नममनोजंदृष्ट्वाधानोसवित
रितेद्वाभ्यांयज्ञंगोषुदुष्वेत्यमितेपंचभिरादित्यमुपतिष्ठेतयोमेराजन्युज्योवासरवा
वेतिवोक्षत्वाजंघ्रित्वामनोजंदृष्ट्वापापकंगंधमाघ्रायाक्ष्णिस्पंदनेकर्णध्वननेचसुच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षोऽहमक्षीभ्यांभूयासंसुवर्चसेनसश्रुत्कर्णाभ्यांभूयासंपशुमान्मुखेनसंमितः
यांगत्वायाज्यंयाजयित्वाभोज्यंभुक्त्वाप्रतिगृह्यप्रतिगृह्यचेत्संयूपंवोपहत्यपुनर्मामैत्वि
न्द्रियंपुनरायुःपुनर्भगः॥पुनर्ब्रह्मणमेतुमांपुनर्ब्राह्मणमेतुमांस्वाहा॥इमेयोधेन्वा
सोऽअग्नयेयथास्थानमहकल्पतां॥वैश्वानरोवाहधानोंतर्यच्छतुमेमनो॥हृदंतर
मस्तस्यकेतुस्त्वाहेत्याज्याहुतीर्जुहुयात्सग्मिथोवाजपेद्वा॥६॥अव्याधनंचेत्स्वपंतमा
दित्योभ्यस्तमियाद्वाग्यतोनुपविश्यान्वाहार्द्रोषंभूत्वायेनसूर्यज्योतिषाबाधसेतमङ्गैतंप
वमिराद्दित्यमुपतिष्ठेतांभ्युदियाच्चेदकर्मश्रांतमनोभिरूपेत्यकर्मणावाग्यतइतिसमा
नमुत्तराभिश्चतसृभिरुपस्थानंयज्ञोपवीतीनित्योदकःसंध्यामुपासीतवाग्यतःसाय
मुत्तरापराभिरुवोन्वष्टमष्टर्शंसावत्रींजपेदर्धास्तमेतेमंउलूआभक्षत्रदर्शनादेवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राणः प्राञ्जुखास्तिष्ठभामंडलदृशिनोत्कपोतश्चेदगारमुपहन्यादनुपनेहृदिवाःकपोतइ
तिप्रत्यृचंजुहुयाज्जपेद्वावयमुत्तापथस्मनइत्यर्चयांचरिष्यन्त्संपूषंन्विदुषेतिनस्म
धिजगमिषन्मूदोवासंपूषंनध्वनइतिमहांतमध्वानमेष्यन्नृतेभयंवा॥७॥अथैता
न्युपकल्पयीतसमावर्तमानोमणिंकुंडलेवस्त्रयुगंछत्रमुपानद्युगंदंडंस्रजमुन्मर्दन
मनुलेपनमंजनमुष्णीषमित्यात्मनेचाचार्यायचयद्युभयोर्नविंदेनाचार्यायेवसमि
धंत्वाहरेदपराजितायांदिशियाज्जयस्यरक्षस्याद्रिमन्नाथकामःपुष्टिकामस्तेजस्का
मोवाब्रह्मवर्चसकामउपवातानुभयीमुभयकामउपरिसमिधंहुत्वागामश्वंचब्राह्म
णेभ्यःप्रदायगोदानकंकर्मकुर्वीतात्मनिमंत्रान्त्संनमयेदेककूलंकेनद्वीनोच्छा
भिरद्भिःस्नात्वायुवंवस्त्रंपरिधायेत्यहतेवाससीआछादयेत्मनस्तेजोसिच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्ष्मेमेपाहीतिचक्षुषीऽआंजयीताश्मनस्तेजोसिश्रोत्रंमेपाहीतिकुंडलेआबध्नीता
नुलेपनेनपाणीप्रक्षिप्यमुखमग्नेब्राह्मणोनुलिंपेह्याहूराजन्यउदरंवैश्यउपस्थंस्त्रू
रुसरणजीविनोनाम्नास्यनाम्नोहिंभूयासमितिस्वजमाप्नोतिबध्नीसनमालोकांमालेति
चेद्भूयःस्त्रागित्यपधापयीतदेवानांप्रतिष्ठेस्थःसर्वतोमापातमित्युपानहावास्थाप
दिवस्छत्रमासीतिछत्रमादत्तेवैणवरसिनानस्त्योसिसर्वतोमापाहीतिवैणवंदंडमा
पुष्यमितिसूत्रेनमणिंकेऽग्रेतिमुच्योष्णीषंकृत्वाग्नेव्रत्सपथमादधात्॥८॥स्मृ
तीनिंदाचविधाचश्रद्धाप्रज्ञाचपंचमी॥इंदंतमधीतंचकृतंसत्यंश्रुतंव्रतं॥यद्ग्नेसं
द्रस्यसत्रजापतिकस्यसत्रऋषिकस्यसत्रऋषिराजन्यस्यसत्रपितृकस्यसत्रपितृराजन्यस्य
समनुष्यस्यसमनुष्यराजन्यस्यसाकाश्रस्यसातीकाश्रस्यसानूकाश्रस्यसप्रतीका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शस्यसेस्वमनुष्यस्यसंगंधवप्सिरस्कस्यसहारण्येभ्वपशुभिर्ग्राम्यैश्चयन्मआत्म
नआत्मानेव्रतेतन्मेसर्वव्रतमिदमहमरेसर्वव्रतोभवामिस्वाहेतिमाग्नेवचेदेति
प्रत्यृचंसमिधोभ्यादध्याधेत्रेनंपूजयेष्यंतोभवंतेतेत्रेतांरात्रींवसेद्घृतांतेगुरुमर्घे
नानिमंत्र्यकृतानुज्ञातस्यवास्नानंतस्येतान्निव्रतान्निभवंतेननक्तंस्नायान्नन्नःस्ना
यान्नन्नःशयीतननग्नांस्त्रियमीक्षेतान्यत्रमेथुनाद्धर्षितनधावेन्नवृक्षमारोहेन्नकू
पमवरोहेन्नवाहुभ्यांनदींतरेन्नसंत्रायमभ्यापद्येतमहद्वैभूतंस्यातकोभवतीतिविज्ञा
यते॥१॥गुरवेप्रस्तुत्यमाणोनामब्रूयादेवदत्तोभोइत्युच्चैरूर्ध्वंनाम्नःप्राणा
पानयोरुपांशुमंद्वैरिंद्रहरिभिरितिचोतोदृङ्गोजपतेप्राणापानयोरुरुव्यचास्तया
प्रपद्येदेवायसवित्रेपरददामीत्यृचंचसमाधौंप्राकूस्वस्तीतिजपित्वामहिचीणामि

राम्
२३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यनुमंत्र्येवमग्निस्रष्टस्यनकुतश्चिद्भयंभवतीतिविज्ञायतेवयसाममनोज्ञावाच्छश्रु
त्वाकृनिकृदज्जनुषंप्रब्रुवाणइतिसूक्तेजपेद्देवींवाचमजनयंतदेवाइतिचस्तुहिश्रु
तंगर्तसदंयुवानमितिमृगस्ययस्यादिशोबिभीयाधस्माद्वानोदिशामुल्मुकमुभय
तःप्रदीप्तंप्रत्यस्येन्मंथंवाप्रसव्यमालोड्याभयंमित्रावरुणामत्यमस्त्वरिष्टाश्चूंह
हंतंप्रतीत्यमाज्ञातारंमाग्नेष्टांनुदंतुमितियोभिंदानमुभयंतुमृत्युमितिसंसृष्टंधन
मुभयंसमाहृतमितिमंथन्यंचंकरोति॥१०॥सर्वतोभयादनाज्ञातादृष्टाद्वाज्याहुती
र्जुहुयात्पृथिवीहृतासाग्निनाहृतातयाहृतयावर्त्यायस्माद्भयाद्बहुभेमितद्वारयेस्वा
हा॥अंतरिक्षंहृतंतद्वायुनाहृतंतेनहृतेनवर्त्रेण्यस्माद्भयाद्बहुभेमितद्वारयेस्वाहा॥
द्यौर्हृतासादित्येनहृतातयाहृतयावर्त्यायस्मा०॥दिशोहृतास्ताश्चंद्रमसाहृतास्ताभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृताभिर्वज्रैरभियस्माद्र०॥ आपोकृतास्तावरुणेनकृतास्ताभिर्कृताभिर्वज्रैरभियस्मा
०॥ प्रजाकृतास्ताः प्राणेनकृतास्ताभिर्कृताभिर्वज्रैरभियस्माद्र०॥ वेदाकृतास्तेछंदोभि
र्कृतास्तेर्कृतैर्वज्रैर्यस्माद्रया०॥ सर्वंकृतंतद्रूपणाकृतंतेनकृतेनयत्रैलोयस्माद्रयाबि
भेमितद्वारयस्वाहेत्यथापराजितायांदिश्यवरुणायस्वस्त्यात्रेयंजपतियतऽइंद्रभ
यामहइतिचसूक्तऽइषं॥११॥ संग्रामेसमुपोव्हेराजानंसभाहयेदातास्तार्षमंतरे
धीतिपश्चाद्रथस्यावरुणायजीमूतस्येवभवतिप्रतीकमितिकवचंप्रयछेदुत्तरपा
धनुरुत्तरांवाचयेत्स्वयंचतुर्थऽंजपेत्संचम्येषुधंप्रयछेदाभिप्रवर्तमानेषष्ठींसत
म्याश्चानष्टमीमिषूनवेक्षमाणंवाचयत्याहरवभोगेःपर्यातेबाहुमातनुलंनत्य
मानमथेवंसारयमाणमुपारुत्याभीवर्तंवाचयतिप्रयोवांमित्रावरुणेतिचद्वेअथैन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मन्वीक्षेताग्निरथशासस्योपरैः प्रधारयंतुमधुनोघृतस्येत्येतत्सौपर्णसवाग्दिवोजुप
र्यादादित्यमौद्यानसंवावरुणायप्रयोधयेदुपश्वासयथिवीमुतद्यामितितृचेनदुंदुभि
मभिमृशेदवसृष्टापरापतेतीषून्विसर्जेद्धनुर्बाणाःसंपतंतीरनुयुध्यमानेषुजपेत्सं
शिष्याद्वासंशिष्याद्वा॥१२॥ ॥इतिगोभिलसूत्रेतृतीयोध्यायः॥ ॥हरिः ओं॥
आहिताग्निश्चेदुपतपेत्प्राच्यामुदीच्यामपराजितायांवादिश्युदवस्येद्ग्रामकामाअ
नपइत्युदाहरंत्यासंज्ञानेरनंग्राममाजिगमिषंतोगदंकुर्युरितिहविज्ञायतेगदःसोमे
नपशुनेष्ट्वेष्ट्वावस्येदग्निष्टावासंस्कृतेभूमिभागंरवानयेद्दक्षिणपूर्वस्यांदिशिदक्षि
णापरस्यांवादक्षिणाश्रवणंग्राग्दक्षिणाश्रवणंवाप्रत्यग्दक्षिणाश्रवणमित्येकेयावानु
द्धाहुकःपुरुषस्तावदायामंव्याममात्रंतिर्यग्वितस्त्यवागग्निनआक्रांतंअमशानंबहुलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षधिकंकरीकेक्षीरेणास्तिनयपोक्षंपुरस्ताद्धत्रसर्वतआपःप्रध्वंसेरन्नेतदाहैवनस्य
लक्षणंश्मशानस्यकेशश्मश्रुलोमनखानीत्युक्षंपुरस्ताद्बर्हिराज्यंचदधन्य
त्रसर्पिरानयंत्येतत्सिध्यंपृषदाज्यं॥१॥अथेतांदिशमग्नीभयंतियज्ञपात्राणिचान्वे
वंप्रेतमयुजोमिथुनाःप्रवयसःपीठचक्रेणगोयुक्तेनेत्येकेनुत्तरणींगामजांवैकव
र्णंकृष्णामेकेसव्येबाहोबध्नानुसंक्रामयंत्यन्वंचोमात्माअथोनिधीताःप्रहृतशिरव
याज्येष्ठप्रथमाःकनिष्ठजघन्याःप्राच्येवंभूमभागेगत्वोदक्तनदीशारवयाग्नेःप्रसव्य
मायतनंपरिव्रजन्प्रोक्षत्यपेतवीतविचसर्पतातइतिदक्षिणपूर्वउद्धृतांस्तआहवनीयं
निदध्यात्युत्तरपश्चिमेगार्हपत्यंदक्षिणपश्चिमेदक्षिणमग्नेनमंसर्वेदीध्मश्चिन्नोंचनो
तियोजानातितत्रस्मिन्बर्हिरास्तीर्यकृष्णाजिनंचोत्तरलोमतस्मिन्प्रेतंसंवेशयंत्युत्तरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लगार्हपत्यंहृत्वाहवनीयमभिशिरसमुत्तरतःपत्नींधनुश्चक्षत्रियायतामुत्थापयेद्वे
वरःप्रतिरूपानीयोंतेवासीजरद्गवोदीर्घनार्यभिजीवलोकमितिकर्तृदृषलेजपे
द्धनुर्हस्मादाददानोमृतस्येतिधनुरुत्तरेषलेधिज्यंकृत्वासंचरंतंपरिचित्यासशीर्यन्निव
हरेत्॥२३॥अथैनामग्निपात्रालियोजयेद्दक्षिणेहस्तेजुहूंसव्यउपभृतंदक्षिणेपार्श्वेस्रुचं
सव्येऽग्नेहोत्रहवणीपुरःसिक्रुवांशिरसिकपालाग्नेदक्षिणायांनासिकयोःस्रुवोभि
तोचेकंकरणीयोश्रोत्रहरोभित्वाचेकमुदरेपात्रींसमवत्तधानंचचमसंसमुपरिष्टाद्ग्रा
मरणीऊर्वोरुलूखलमुसलेजंघयोःशूर्पंछित्वाचेकमासेचनवत्तेषदाज्यस्य
पूरयंत्यमापुत्रोदृषदुपलेकुवित्तलोहायसंचकौशलमनुस्तरण्यापामुल्खधाशिरोमु
खंप्रच्छाद्येदग्नेर्वर्मपरिगोभिव्ययस्वेतिदक्षाउद्धत्यपाण्योरादध्यादतिद्रवसारमेयौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्वानाविसदक्षिणेदक्षिणंसव्येसव्यंहृदयेहृदयंपेंड्यौचेकेशकापचारइत्येसर्वंय
थांगंवानक्षिप्यचर्मणाप्रछाद्येममग्नेचमसंमाविजिक्करइतिप्रणीताप्रणयनमनुमं
त्र्यतेसव्यंजान्वाच्यदक्षिणाग्नावाज्याहुतीर्जुहुयादग्नयेस्वाहाकामायस्वाहालोका
यस्वाहानुमतयेस्वाहेतिपंचमीसुरासिक्तेनस्यास्मोहेत्वमजायथाअयंत्वदधिजायता
मसोस्वर्गयिलोकायस्वाहेति॥३॥प्रेष्यतियुगपदग्नीन्प्रज्वालयेत्साहवनीयश्चेत्पूर्व
मागुयात्स्वर्गलोकएनंप्रापदंतावेधाद्रात्स्यत्यसावमुत्रैवमयमग्निपुत्रोगार्ह
पत्यश्चेत्पूर्वमागुयादंतरिक्षलोकएनंप्रापदंतावेधाद्रात्स्यत्यसावमुत्रैवमयमग्नि
भिपुत्रोदक्षिणाग्निश्चेत्पूर्वमागुयान्मनुष्यलोकएनंप्रापदंतावेधाद्रात्स्यत्यसावमु
त्रैवमयमग्निभिपुत्रोयुगपत्त्रयोपराग्रहेवदंतेनंदत्यमानमनुमंत्रयत्रेग्रेहग्रेह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाथोभिपूर्व्वैर्भिरतसमानंसएवंविधादृश्यमानःसेहेवधूमेनस्वर्गलोकमेतीतिनेवि
ज्ञायतउत्तरपुरस्तादाहवनीयस्यजानुमात्रंगर्त्तंखात्वावकाशींपालशमित्यवधापयेत्त
तोहवाएषनिष्क्रम्यसेहेवधूमेनस्वर्गलोकमेतीतिविज्ञायतइमेजीवाविमृतेरावहन्त्व
मितिसव्याहृतोव्रजंत्यनवेक्षमाणायत्रोदकमवहृद्भवतितस्मात्प्यंसकृदुन्मज्जेत्कांज
लिमुत्सृज्यनस्यंगोत्रंनामचगृहीत्वोत्तीर्यव्यानिव्यासांसिपरिधायसकृदेनाव्यापी
योदग्दशानिविसृज्यासनआनक्षत्रदर्शनादादित्यस्यवादृश्यमानेप्रविशेयुःकृत्वि
क्षप्रथमाज्येष्ठजघन्याःप्राप्यागारमश्मानमग्निंगोमयमक्षतांतैलमपउपस्पृशंतेत
नेनस्यांरात्र्यामन्नंपचेरन्क्षीरोत्सेचनावर्त्तेरंस्त्रिरात्रमक्षारालवणाशिनस्फुद्दि
शराषामहागुरुषुदानाध्ययनेवर्जयेरन्दशहंसापेऽष्टशुरोचासापेऽष्टभक्तासुचस्त्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुत्रिरात्रमितरेष्वाचार्येषुज्ञातोचासगंधैः प्रज्ञासुचरस्त्रीष्वदंतजातेपरिजातेचैकाहं
सब्रह्मचारिणिसमानगामीयेचश्रोत्रिये॥४॥संचयन्मूर्धंदशम्याःकृष्णपक्षस्या
युजास्वेकनक्षत्रेलक्षणेकुंभेपुमांसमलक्षणायांस्त्रियमयुजोमिथुनाःप्रवयसःस्त्री
रोदकेनशमीशारक्याग्नेःप्रसव्यमायतनंपरिव्रजन्प्रोक्षतिशीतिकेशीतिकावती
त्यंगुष्ठोपकनिष्ठिकाभ्यामेकैकमस्थ्यसंदाद्यंतोवदध्युः पादौपूर्वंशिरउत्तरंसुसंचि
तंसंचित्यपवनेनसंधूयचित्रसर्वतआपोनाभिस्यंदेरन्नाभ्यावर्षंभिस्तत्रगर्तेवदध्युरु
पसर्पमातरंभूमिमेनामित्युत्तरयापांसूनवकिरेदवकीर्येत्तिरासुत्तेस्तन्नामीतिकपाले
नापिधायाथानवेक्षंप्रत्यावृज्यापउपस्पृश्यश्राद्धमस्मेदधः॥५॥गुरुणाभिमृताज्ञ
न्यतोवापक्षीयमाणेअमावास्यायांशीतिकर्मकुर्वीरन्पुरोदयादग्निंसहभस्मानंस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हायतनंदक्षिणाहरेयुःऋव्यादमग्निंप्रहिणोमिदूरमित्यर्धर्चेनिनंचष्प्रथेन्युप्ययत्र
वात्रिःप्रसव्यंपरियंतिसव्यैःपाणिभिःसव्यानूरूनाघ्नानाप्रयानवेक्षंत्रत्याञ्जा
पउपस्पृश्यकेशश्मश्रुलोमनखानिवापयित्वोपकल्पयीरन्भवान्मालिकान्कुंभाना
चमनीयांश्चशमीसुमनोमालिनःशमीमयमिध्मंशमीमध्यावरणीपरिधीश्चानड्वा
गोमयंचर्मचनवनीतमश्मानंचयावत्सोयुवतयस्तावंतंकुशगुंजूत्सान्यग्निवेद्याग
मग्निंजनयेद्दैवायमितरोजातवेदाइत्यर्धर्चेननंदीपयमानाआसेतआशंतरा
त्मादायुष्मतांकथाःकीर्तयेन्नोमांगल्यानीतिहासपुराणानीत्याख्यापयमानाउपर
तेषुशब्देषुसंप्रविष्टेषुवागृहंगत्वेशानंवादक्षिणाद्वारपक्षात्प्रक्रम्यावरुह्यामुष्क
धारंहरेत्तंतुंतन्वन्प्रजसोभानुमग्निहीत्युत्तरस्मादग्निमुपसमाधायपश्चादस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नउहंचमास्तीर्यग्रीवमुत्तरलोमतास्मिभमात्मानारोहयेदारोहतायुजीरसंरणा
नाइतीमंजीवेभ्यःपरिधेंददामीतेनपरिधेंपरिदध्यादंतर्मृत्युंदधतांपर्वतेनेत्यश्मान
मुत्तरतोग्नेःकृत्वापरंमृत्योअनुपरेहपंथांमतेचनस्वस्तिःप्रत्यंचंहुत्वायथाहान्यनु
पूर्वंभवंतीत्यमात्मानीक्षेतयुवतयःपृथक्पाणिभ्योदर्भानरुणेकेनवनीतेनचांगुष्ठो
पकानक्षिकाभ्यामक्षिणीआंज्यपरंचोत्सृजेयुरमानारीरविधवाःसुपत्नीरित्यंज
नाईक्षेतांश्मन्वतीरायतेसंरभध्वमित्यश्मानंकर्माप्रथमोभिमृशेदथापराजितायां
दिशियवरुछायाग्निनानुहेमगोमयेनचाविछिन्नयाचोदकधारयापोहिष्ठामयोभुव
इतिसूचेनपरीमेगामनेषतेतपरिक्रामत्सुजपेतसंगलोनद्वान्परिणेयस्यादित्युदा
हरंत्यथोपवेशंतियत्राभिरंस्यमानाभवंत्यहतेनवाससाप्रछाद्यासनेस्वपंतओद

राम्
२८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यादुदितआदित्येसोयागिस्वस्त्ययनाग्निचजपित्वान्नंसंस्कृत्यापनःशोशुचदघ
मितिप्रत्यृचंहुत्वाब्राह्मणान्भोजयित्वास्वस्त्ययनंवाचयीतगोः कंसोहतंवासश्वद
क्षिणा॥६॥ अथातःपार्वणश्राद्धंकाम्याआभ्युदयिकएकोद्दिष्टेवाब्राह्मणान्शुच
शीलवृत्तसंपन्नानेकेनवाकालेज्ञापितान्स्नातान्कृतपश्चोचानाचांजानुदङ्मुखान्प्
तृवदुपवेश्यैकैकमेकैकस्यद्वौद्वौत्रींस्त्रीन्वाहृद्यैः फलभूयस्त्वंनत्वेवैकंसर्वेषांकमम
नाखेपिंडैर्व्याख्यातम्पः प्रदायदर्भान्हूगुणभुग्नानासंनंप्रदायापः प्रदायतैजसाइम
मयमृन्मयेषुश्रपात्रेष्वेकद्रव्येषुवादर्भांतर्हितेष्वपआसिच्यत्रांनोदेवीरभिष्टयइ
त्यनुमंत्रितासुनेलानावपतितिलोसिसोमदेवत्योगोसवेदेवानमितिः॥ प्रत्नवद्भिः
प्रत्नैस्वधयापितृनमांलोकान्श्रीणयाहिनः स्वधानमइतिप्रसव्येनेतरपाल्यंगुष्ठां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेरेणोपवीतित्वादक्षिणेनवासव्योपगृहीतेनापसव्यंदत्तेअर्घ्यंपितामहेदत्तेअर्घ्यं
प्रपितामहेदत्तेअर्घ्यमित्यपूर्वेनाःप्रतियाहायेभ्यन्त्सकृत्सकृत्स्वधाअर्घ्याद्रिनेत्र
सृष्टाअनुमंत्र्ययेतयादेव्याआपःपृथिवसंबभूवुर्याअंतरिक्ष्याउतपार्थिवीर्याः॥
हिरण्यवर्णायज्ञियास्तानआपःशंस्योनाभवंत्वितिसंस्रवान्त्समवनीयनाभिरद्भिः
पुत्रकामोमुखमनक्ति॥नोच्छेत्स्यथमंपात्रंपितृणामर्घ्यपात्रितं॥आवृत्तास्तत्रतिष्ठं
तिपितरःशौनकोब्रवीत्॥उच्छेद्यदिचेत्पात्रंविवृत्तंवायदाभवेत्॥नदासुरंभवेच्छ्रा
द्धंकुक्कुटैःपितृगोरतिरितं॥७॥एतस्मिन्कालेगंधमाल्यधूपदीपाच्छादनानांप्रदा
नमुदकस्यघृतान्नकामन्नमनुज्ञापयत्यग्नौकरिष्येकरवैकरवाणीतिवाप्रत्यभ्यनुज्ञा
क्रियतांकुरुष्वकुर्वित्यथाग्नौजुहोतियथोक्तंपुरस्तादभ्यनुज्ञायांपाणिष्वेववाग्नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुखोवेदेवाःपाणिमुखाःपितरइतिहब्राह्मणंयद्दक्षिणेष्वाचांतेष्वन्यद्भमनु
दिशत्यन्नमन्नेसृष्टंदत्तमनुकामंतृप्तान्ज्ञात्वामधुमतीःश्रावयेदक्षन्नमीमद
तेतृप्तसंपन्नमितिहृष्टायघद्भमुपभुक्तंतन्नरुद्रालीपाकेनसहपिंडार्थमुद्धृत्यशे
षान्निवेदयेद्भमतेनुमतेवाभुक्तवत्स्वनाचांतेषुपिंडाग्निद्ध्यादाचांतेष्वेकेप्रकीर्य
न्नमुपवीयोंस्वधोच्यामितेनिवपेज्जेदस्तुस्वधेतिवा॥८॥अथशूलगवःशरदिवसंते
वाईयाग्नेष्ठंस्वस्ययूपस्याकृष्टेशुष्कल्माषमित्येकेकामंकृष्णमालोहवांश्वेद्वीहि
यवमतीभिरद्भिरभिषिच्यशरस्तआभसतोरुद्रायमहादेवायजुष्टोषधीस्तेतं
वर्धयेत्संपन्नदंतमृषभंवायज्ञियायांदिश्यसंदृश्यामादूर्ध्वमर्धरात्रादुरितइत्येके
वेधंचरित्रवंतंब्रह्माणमुपवेश्यसपलाशंगमार्द्रशरवायूपनिरवासंव्रजत्योकुशर

ज्रूवारण्ये अन्यतरयायूपंपरिवीयान्यतरयार्धशिरसिपशुबध्वायूपेरशनायांवा
नियुनक्त्यस्मैनमस्तस्मैत्वाजुष्टन्नियुनज्मीतिप्रोक्षणादिसमानंपशुनाविशेषा
न्वक्ष्यामः पात्र्यापलाशेनवावपांजुहुयादितिहविज्ञायतेहरायमृडायशर्वायशिवा
यभवायमहादेवायोग्रायभीमायपशुपतयेरुद्रायशंकरायेशानायस्वाहेतिषड्भि
र्वेत्तिरेरुद्रायस्वाहेतिवाचतस्रभिश्चतस्रभिकुशसूनासुचतस्रभिर्दक्षुबालंहरेयास्ते
रुद्रपूर्वस्यांदिशिसेनास्ताभ्याएनंनमस्तेअस्तुमामाहिंसीरित्येवंप्रतिदिशंत्वादेश
नंचतुर्भिःसूत्रैश्चतस्रोदिशउपतिष्ठेतेकुद्रायेभारुद्रायातेपतयेभारुद्रायस्व
धन्वनइतिसर्वरुद्रयज्ञेषुदिशामुपस्थानंनुषाम्फलीकरणांश्चपुछंचर्मशिरःपा
दानिस्नावनुप्रहरेद्वोगंचर्मणाकुर्वंतेतेशांवत्यउत्तरलोम्नेदर्भचीतासुकुशास्तू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नासुवाङ्गोणितंगर्भिनयेछ्वासिनीघोषिणीर्वेचन्वतीःसमश्नुवीःसर्पाएतद्वोनेनवः
प्रीणातीत्यथोदंडावृत्यश्वासिनीघोषिणीर्वेचन्वतीःसमश्नुवीःसर्पाएतद्वोन्नतद्धर
ध्वमितिसर्पेभ्योयन्नवास्तूवध्वंवावस्तुंभवतितद्धरंतिसर्पाःसर्वाल्लिहवाअस्यनाम
धेयाग्निसर्वाःसेनाःसर्वाण्युछ्रयणानीत्येवंविद्यजमानंप्रीणातिनास्यब्रुवाणंचनहि
नस्तीतिविज्ञायतेनास्यभ्रात्रीयान्नास्यग्राममाहरेयुरभिमाहुकोहैषदेवःप्रजाभवती
त्यमात्यानंततःप्रतिषेधयेन्नियोगात्तुभ्रात्रीयात्त्वस्ययज्ञतिसरूपश्लगवोधन्योलो
क्यःपुण्यःपुत्र्यःपशव्यआयुष्योयन्नास्यइष्टान्यमुत्सृजेन्नातुत्सृष्टस्योन्महापशुर्भव
तीतिविज्ञायतेशंनातीयन्नपन्नृहानियात्सूनामुपवापएतमेवदेवंमध्येगोष्ठस्ययजे
तरुशालीपाकंसर्पिर्हुतंबर्हिराज्यंचानुग्रहस्यधूमतोगाआनयेछंनातीयजपन्पशूनांम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यमियान्मध्यमियान्नमःशौनकायनमःशौनकाय॥९॥इत्याश्वलायनगृह्यसूत्रेच
तुर्थेध्यायःसमाप्तः॥श्रीगुरुचरणारविंदार्पणमस्तु॥शुभंभवतु॥श्रीरस्तु॥ ॥
इदंपुस्तकंचिंतामणिजोस्युपनामकटोंकेकरयांचेस्वार्थपरमार्थंचलिख्यते॥शके१७६५
राक्षसनामसंवत्सरेदक्षिणायनेहेमंतऋतौपौषमासेशुक्लपक्षेतृतीयायांमंदवासरेप्र
थमप्रहरेसमाप्तमगमत्॥छ॥श्रीराम॥ ५॥

यादृशंपुस्तकंदृष्ट्वातादृशंलिखितंमया॥यदिशुद्धमशुद्धंवाममदोषोनविद्यते॥१॥छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=03.07.20 14:37
,TRANSFERRED=2020/07/03 at 14:44:09
,PAGES=63
,TYPE=STD
,NAME=S0003272
,Book Name=M-2478-AASHVLAMAN GRIHSUTRA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection